# श्रीमद् भागवत रसिक कुटुंब

## सौन्दर्य लहरी

### प्रथम भागः- आनन्द लहरी

भूमौस्खलितपादानां(म्) भूमिरेवावलम्बनम् ।
त्वयी जाता पराधानां(न्) त्वमेव शरणं(म्) शिवे ॥

शिवः(श्)शक्त्या युक्तो यदि भवति शक्तः(फ्) प्रभवितुं(न्)
न चेदेवं(न्) देवो न खलु कुशलः(स्) स्पन्दितुमपि ।
अतस्त्वामाराध्याम् हरिहरविरिञ्चादिभिरपि
प्रणन्तुं(म्) स्तोतुं(वँ) वा कथमकृतपुण्यः(फ्) प्रभवति ॥ 1 ॥

तनीयां(म्)सं(म्) पां(म्)सुं(न्) तव चरणपङ्केरुहभवं(वँ)
विरिञ्चिस्सञ्चिन्वन् विरचयति लोकानविकलम् ।
वहत्येनं(म्) शौरिः(ख्) कथमपि सहस्रेण शिरसाम्
हरस्सङ्क्षुद्यैनम् भजति भसितोद्धूलनविधिम् ॥ 2 ॥

अविद्यानामन्त-स्तिमिर-मिहिरद्वीपनगरी
जडानां(ञ्) चैतन्य-स्तबक-मकरन्द-स्रुतिझरी ।
दरिद्राणां(ञ्) चिन्तामणिगुणनिका जन्मजलधौ

निमग्नानां(न्) दं(म्)ष्ट्रा, मुररिपु-वराहस्य भवति ॥ 3 ॥

त्वदन्यः(फ्) पाणिभ्यामभयवरदो दैवतगणः
त्वमेका नैवासि प्रकटितवराभीत्यभिनया ।
भयात् त्रातुं(न्) दातुम् फलमपि च वाञ्छासमधिकम्
शरण्ये लोकानां(न्) तव हि चरणावेव निपुणौ ॥ 4 ॥

हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीम्
पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत् ।
स्मरोऽपि त्वां(न्) नत्वा, रतिनयनलेह्येन वपुषा
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ॥ 5 ॥

धनुः(फ्) पौष्पं(म्) मौर्वी मधुकरमयी पञ्च विशिखाः
वसन्तः(स्) सामन्तो मलयमरुदायोधनरथः ।
तथाप्येकः(स्) सर्वम् हिमगिरिसुते कामपि कृपाम्
अपाङ्गात्ते लब्ध्वा जगदिद-मनङ्गो विजयते ॥ 6 ॥

क्वणत्काञ्चीदामा करिकलभकुम्भस्तननता
परिक्षीणा मध्ये परिणतशरच्चन्द्रवदना ।
धनुर्बाणान् पाशम् सृणिमपि दधाना करतलैः(फ्)
पुरस्तादास्तां(न्) नः(फ्) पुरमथितुराहोपुरुषिका ॥ 7 ॥

सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाकारे मञ्चे परमशिवपर्यङ्कनिलयां(म्)

भजन्ति त्वां(न्) धन्याः(ख्) कतिचन चिदानन्दलहरीम् ॥ 8 ॥

महीं(म्) मूलाधारे कमपि मणिपूरे हुतवहम्
स्थितं(म्) स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि ।
मनोऽपि भ्रूमध्ये सकलमपि भित्वा कुलपथम्
सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥ 9 ॥

सुधाधारासारैश्चरणयुगलान्तर्विगलितैः
प्रपञ्चं(म्) सिञ्चन्ती पुनरपि रसाम्नायमहसः ।
अवाप्य स्वां(म्) भूमिम् भुजगनिभमध्युष्टवलयम्
स्वमात्मानं(ङ्) कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥ 10 ॥

चतुर्भिः(श्) श्रीकण्ठैः(श्) शिवयुवतिभिः(फ्) पञ्चभिरपि
प्रभिन्नाभिः(श्) शम्भोर्नवभिरपि मूलप्रकृतिभिः ।
चतुश्चत्वारिं(म्)शत् वसुदलकलाश्रत्रिवलय-
त्रिरेखाभिः(स्) सार्धं(न्) तव शरणकोणाः(फ्) परिणताः ॥11 ॥

त्वदीयं(म्) सौन्दर्यं(न्) तुहिनगिरिकन्ये तुलयितुं(ङ्)
कवीन्द्राः(ख्) कल्पन्ते कथमपि विरिञ्चिप्रभृतयः ।
यदालोकौत्सुक्यादमरललना यान्ति मनसा
तपोभिर्दुष्प्रापामपि गिरिशसायुज्यपदवीम् ॥ 12 ॥

नरं(वँ) वर्षीयां(म्)सं(न्) नयनविरसं(न्) नर्मसु जडं(न्)
तवापाङ्गालोके पतितमनुधावन्ति शतशः ।
गलद्वेणीबन्धाः(ख्) कुचकलशविस्रस्तसिचया,

हठात् त्रुट्यत्काञ्च्यो विगलितदुकूला युवतयः ॥ 13 ॥
क्षितौ षट्पञ्चाशत् द्विसमधिकपञ्चाशदुदके
हुताशे द्वाषष्टिश्चतुरधिकपञ्चाशदनिले ।
दिवि द्विष्षट्त्रिं(म्)शत् मनसि च चतुष्षष्टिरिति ये
मयूखास्तेषामप्युपरि तव पादाम्बुजयुगम् ॥ 14 ॥

शरज्ज्योत्स्नाशुद्धां(म्) शशियुतजटाजूटमकुटां(वँ)
वरत्रासत्राणस्फटिकघटिकापुस्तककराम् ।
सकृन्न त्वा नत्वा कथमिव सतां(म्) सन्निदधते
मधुक्षीरद्राक्षामधुरिमधुरीणाः भणितयः ॥ 15 ॥

कवीन्द्राणां(ञ्) चेतः(ख्) कमलवनबालातपरुचिम्
भजन्ते ये सन्तः(ख्) कतिचिदरुणामेव भवतीम् ।
विरिञ्चिप्रेयस्यास्तरुणतरशृङ्गारलहरी-
गभीराभिर्वाग्भिर्विदधति सतां(म्) रञ्जनममी ॥ 16 ॥

सवित्रीभिर्वाचाम् शशिमणिशिलाभङ्गरुचिभिः
वशिन्याद्याभिस्त्वाम् सह जननि सञ्चिन्तयति यः ।
स कर्ता काव्यानाम् भवति महतां(म्) भङ्गिरुचिभिः
वचोभिर्वाग्देवीवदनकमलामोदमधुरैः ॥ 17 ॥

तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभिः
दिवं(म्) सर्वामुर्वीमरुणिमनि मग्नां(म्) स्मरति यः ।
भवन्त्यस्य त्रस्यद्वनहरिणशालीननयनाः(स्)

सहोर्वश्या वश्याः(ख्) कति कति न गीर्वाणगणिकाः ॥ 18 ॥

मुखं(म्) बिन्दुं(ङ्) कृत्वा कुचयुगमधस्तस्य तदधो
हरार्धं(न्) ध्यायेद्यो हरमहिषि ते मन्मथकलाम् ।
स सद्यः(स्) सङ्क्षोभं(न्) नयति वनिता इत्यतिलघु
त्रिलोकीमप्याशु भ्रमयति रवीन्दुस्तनयुगाम् ॥ 19 ॥

किरन्तीमङ्गेभ्यः(ख्) किरणनिकुरुम्बामृतरसम्
हृदि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः ।
स सर्पाणां(न्) दर्पम् शमयति शकुन्ताधिप इव
ज्वरप्लुष्टान् दृष्ट्या सुखयति सुधाधारसिरया ॥ 20 ॥

तटिल्लेखातन्वीं(न्) तपनशशिवैश्वानरमयीं(न्)
निषण्णां(म्) षण्णामप्युपरि कमलानां(न्) तव कलाम् ।
महापद्माटव्याम् मृदितमलमायेन मनसा
महान्तः(फ्) पश्यन्तो दधति परमाह्लादलहरीम् ॥ 21 ॥

भवानि त्वं(न्) दासे मयि वितर दृष्टिं(म्) सकरुणा-
मिति स्तोतुं(वँ) वाञ्छन् कथयति भवानि त्वमिति यः ।
तदैव त्वं(न्) तस्मै दिशसि निजसायुज्यपदवीम्
मुकुन्दब्रह्मेन्द्रस्फुटमकुटनीराजितपदाम् ॥ 22 ॥

त्वया हृत्वा वामं(वँ) वपुरपरितृप्तेन मनसा
शरीरार्धं(म्) शम्भोरपरमपि शङ्के हृतमभूत् ।
यदेतत्त्वद्रूपम् सकलमरुणाभं(न्) त्रिनयनं(ङ्)

कुचाभ्यामानम्रं(ङ्) कुटिलशशिचूडालमकुटम् ॥ 23 ॥

जगत्सूते धाता हरिरवति रुद्रः क्षपयते
तिरस्कुर्वन्नेतत्  स्वमपि वपुरीशस्तिरयति ।
सदापूर्वः(स्) सर्वं(न्) तदिदमनुगृह्णाति च शिवस्-
तवाज्ञामालम्ब्य क्षणचलितयोर्भ्रूलतिकयोः ॥ 24 ॥

त्रयाणां(न्) देवानां(न्) त्रिगुणजनितानां(न्) तव शिवे
भवेत् पूजा पूजा तव चरणयोर्या विरचिता ।
तथा हि त्वत्पादोद्वहनमणिपीठस्य निकटे
स्थिता ह्येते शश्वत् मुकुलितकरोत्तंसमकुटाः ॥ 25 ॥

विरिञ्चिः(फ्) पञ्चत्वं(वँ) व्रजति हरिराप्नोति विरतिं(वँ)
विनाशं(ङ्) कीनाशो भजति धनदो याति निधनम् ।
वितन्द्री माहेन्द्री विततिरपि सम्मीलितदृशा
महासं(म्)हारेऽस्मिन् विहरति सति त्वत्पतिरसौ ॥ 26 ॥

जपो जल्पः(श्) शिल्पम् सकलमपि मुद्राविरचना
गतिः(फ्) प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः ।
प्रणामस्सं(वँ)वेशस्सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ॥ 27 ॥

सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरिणीं(वँ)
विपद्यन्ते विश्वे विधिशतमखाद्या दिविषदः ।
करालं(यँ) यत्क्ष्वेलं(ङ्) कबलितवतः(ख्) कालकलना

न शम्भोस्तन्मूलं(न्) तव जननि ताटङ्कमहिमा ॥ 28 ॥

किरीटं(वँ) वैरिञ्चम् परिहर पुरः(ख्) कैटभभिदः(ख्)
कठोरे कोटीरे स्खलसि जहि जम्भारिमकुटम् ।
प्रणम्रेष्वेतेषु प्रसभमुपयातस्य भवनं(म्)
भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ॥ 29 ॥

स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिरभितो
निषेव्ये नित्ये त्वामहमिति सदा भावयति यः ।
किमाश्चर्यं(न्) तस्य त्रिनयनसमृद्धिं(न्) तृणयतो
महासं(वँ)वर्ताग्निर्विरचयति नीराजनविधिम् ॥ 30 ॥

चतुष्षष्ट्या तन्त्रैः(स्) सकलमतिसन्धाय भुवनम्
स्थितस्तत्तत्सिद्धिप्रसवपरतन्त्रैः(फ्) पशुपतिः ।
पुनस्त्वन्निर्बन्धादखिलपुरुषार्थैकघटना-
स्वतन्त्रं(न्) ते तन्त्रं(ङ्) क्षितितलमवातीतरदिदम् ॥ 31 ॥

शिवः(श्) शक्तिः(ख्) कामः क्षितिरथ रविः(श्) शीतकिरणः
स्मरो हंसः(श्) शक्रस्तदनु च परामारहरयः ।
अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता
भजन्ते वर्णास्ते तव जननि नामावयवताम् ॥ 32 ॥

स्मरं(यँ) योनिं(लँ) लक्ष्मीं(न्) त्रितयमिदमादौ तव मनोर्-
निधायैके नित्ये निरवधिमहाभोगरसिकाः ।
भजन्ति त्वां(ञ्) चिन्तामणिगुननिबद्धाक्षवलयाः(श्)

शिवाग्नौ जुह्वन्तः(स्) सुरभिघृतधाराहुतिशतैः ॥ 33 ॥

शरीरं(न्) त्वं(म्) शम्भोः(श्) शशिमिहिरवक्षोरुहयुगं(न्)
तवात्मानं(म्) मन्ये भगवति नवात्मानमनघम् ।
अतश्शेषश्शेषीत्ययमुभयसाधारणतया
स्थितः(स्) सम्बन्धो वाम् समरसपरानन्दपरयोः ॥ 34 ॥

मनस्त्वं(वँ) व्योम त्वम् मरुदसि मरुत्सारथिरसि
त्वमापस्त्वं(म्) भूमिस्त्वयि परिणतायां(न्) न हि परम् ।
त्वमेव स्वात्मानम् परिणमयितुं(वँ) विश्ववपुषा
चिदानन्दाकारम् शिवयुवति भावेन बिभृषे ॥ 35 ॥

तवाज्ञाचक्रस्थं(न्) तपनशशिकोटिद्युतिधरम्
परं(म्) शम्भुं(वँ) वन्दे परिमिलितपार्श्वं(म्) परचिता ।
यमाराध्यन् भक्त्या रविशशिशुचीनामविषये
निरालोकेऽलोके निवसति हि भालोकभुवने ॥ 36 ॥

विशुद्धौ ते शुद्धस्फटिकविशदं(वँ) व्योमजनकम्
शिवं(म्) सेवे देवीमपि शिवसमानव्यवसिताम् ।
ययोः(ख्) कान्त्या यान्त्याः(श्) शशिकिरणसारूप्यसरणे-
विधूतान्तर्ध्वान्ता विलसति चकोरीव जगती ॥ 37 ॥

समुन्मीलत् सं(वँ)वित् कमलमकरन्दैकरसिकम्
भजे हं(म्)सद्वन्द्वं(ङ्) किमपि महतां(म्) मानसचरम् ।
यदालापादष्टादशगुणितविद्यापरिणतिर्-

यदादत्ते दोषात् गुणमखिलमद्भ्यः(फ्) पय इव ॥ 38 ॥
तव स्वाधिष्ठाने हुतवहमधिष्ठाय निरतं(न्)
तमीडे संवर्तं(ञ्) जननि महतीं(न्) तां(ञ्) च समयाम् ।
यदालोके लोकान् दहति महति क्रोधकलिते
दयार्द्रा या दृष्टिः(श्) शिशिरमुपचारं(म्) रचयति ॥ 39 ॥

तटित्त्वन्तं(म्) शक्त्या तिमिरपरिपन्थिस्फुरणया
स्फुरन्नानारत्नाभरणपरिणद्धेन्द्रधनुषम् ।
तव श्यामं(म्) मेघं(ङ्) कमपि मणिपूरैकशरणं(न्)
निषेवे वर्षन्तम् हरमिहिरतप्तं(न्) त्रिभुवनम् ॥ 40 ॥

तवाधारे मूले सह समयया लास्यपरया
नवात्मानं(म्) मन्ये नवरसमहाताण्डवनटम् ।
उभाभ्यामेताभ्यामुदयविधिमुद्दिश्य दयया
सनाथाभ्यां(ञ्) जज्ञे जनकजननीमज्जगदिदम् ॥ 41 ॥

## द्वितीय भागः- सौन्दर्य लहरी

गतैर्माणिक्यत्वं(ङ्) गगनमणिभिः(स्) सान्द्रघटितं(ङ्)
किरीटं(न्) ते हैमम् हिमगिरिसुते कीर्तयति यः ।
स नीडेयच्छायाच्छुरणशबलं(ञ्) चन्द्रशकलं(न्)
धनुः(श्) शौनासीरं(ङ्) किमिति न निबध्नाति धिषणाम् ॥42 ॥

धुनोतु ध्वान्तं(न्) नस्तुलितदलितेन्दीवरवनं(ङ्)
घनस्निग्धश्लक्ष्णं(ञ्) चिकुरनिकुरुम्बं(न्) तव शिवे ।
यदीयं(म्) सौरभ्यम् सहजमुपलब्धुं(म्) सुमनसो

वसन्त्यस्मिन् मन्ये वलमथनवाटीविटपिनाम् ॥ 43 ॥

तनोतु क्षेमं(न्) नस्तव वदनसौन्दर्यलहरी-
परीवाहस्रोतः(स्)सरणिरिव सीमन्तसरणिः ।
वहन्ती सिन्दूरम् प्रबलकबरीभारतिमिर-
द्विषां(म्) वृन्दैर्बन्दीकृतमिव नवीनार्ककिरणम् ॥ 44 ॥

अरालैः(स्) स्वाभाव्यादलिकलभसश्रीभिरलकैः
परीतं(न्) ते वक्त्रम् परिहसति पङ्केरुहरुचिम् ।
दरस्मेरे यस्मिन् दशनरुचिकिञ्जल्करुचिरे
सुगन्धौ माद्यन्ति स्मरदहनचक्षुर्मधुलिहः ॥ 45 ॥

ललाटं(लँ) लावण्यद्युतिविमलमाभाति तव यद्-
द्वितीयं(न्) तन्मन्ये मकुटघटितं(ञ्) चन्द्रशकलम् ।
विपर्यासन्यासादुभयमपि सम्भूय च मिथः(स्)
सुधालेपस्यूतिः(फ्) परिणमति राकाहिमकरः ॥ 46 ॥

भ्रुवौ भुग्ने किञ्चित् भुवनभयभङ्गव्यसनिनि
त्वदीये नेत्राभ्यांम् मधुकररुचिभ्यां(न्) धृतगुणम् ।
धनुर्मन्ये सव्येतरकरगृहीतं(म्) रतिपतेः(फ्)
प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तरमुमे ॥ 47 ॥

अहः(स्) सूते सव्यं(न्) तव नयनमर्कात्मकतया
त्रियामां(वँ) वामं(न्) ते, सृजति रजनीनायकतया ।

तृतीया ते दृष्टिर्दरदलितहेमाम्बुजरुचिः(स्)
समाधत्ते सन्ध्यां(न्) दिवसनिशयोरन्तरचरीम् ॥ 48 ॥

विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः(ख्)
कृपाधाराधारा किमपि मधुराभोगवतिका ।
अवन्ती दृष्टिस्ते बहुनगरविस्तारविजया
ध्रुवं(न्) तत्तन्नामव्यवहरणयोग्या विजयते ॥ 49 ॥

कवीनां(म्) सन्दर्भस्तबकमकरन्दैकरसिकं(ङ्)
कटाक्षव्याक्षेपभ्रमरकलभौ कर्णयुगलम् ।
अमुञ्चन्तौ दृष्ट्वा तव नवरसास्वादतरला-
वसूयासं(म्)सर्गादलिकनयनं(ङ्) किञ्चिदरुणम् ॥ 50 ॥

शिवे शृङ्गारार्द्रा तदितरजने कुत्सनपरा
सरोषा गङ्गायां(ङ्) गिरिशचरिते विस्मयवती ।
हराहिभ्यो भीता सरसिरुहसौभाग्यजननी
सखीषु स्मेरा ते मयि जननी दृष्टिः(स्)सकरुणा ॥ 51 ॥

गते कर्णाभ्यर्णं(ङ्) गरुत इव पक्ष्माणि दधती
पुरां(म्) भेत्तुश्चित्तप्रशमरसविद्रावणफले ।
इमे नेत्रे गोत्राधरपतिकुलोत्तं(म्)सकलिके
तवाकर्णाकृष्टस्मरशरविलासं(ङ्) कलयतः ॥ 52 ॥

विभक्तत्रैवर्ण्यं(वँ) व्यतिकरितलीलाञ्जनतया

विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते ।
पुनः(स्)स्रष्टुं(न्) देवान् द्रुहिणहरिरुद्रानुपरतान्
रजः(स्) सत्त्वं(म्) बिभ्रं(न्) तम इति गुणानां(न्) त्रयमिव ॥ 53 ॥

पवित्रीकर्तुं(न्) नः(फ्) पशुपतिपराधीनहृदये
दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः ।
नदः(श्) शोणो गङ्गा तपनतनयेति ध्रुवममुं(न्)
त्रयाणां(न्) तीर्थानामुपनयसि सम्भेदमनघम् ॥ 54 ॥

निमेषोन्मेषाभ्याम् प्रलयमुदयं(यँ) याति जगती
तवेत्याहुः(स्) सन्तो धरणिधरराजन्यतनये ।
त्वदुन्मेषाज्जातं(ञ्) जगदिदमशेषं(म्) प्रलयतः(फ्)
परित्रातुं(म्) शङ्के परिहृतनिमेषास्तव दृशः ॥ 55 ॥

तवापर्णे कर्णेजपनयनपैशुन्यचकिता
निलीयन्ते तोये नियतमनिमेषाः(श्) शफरिकाः ।
इयं(ञ्) च श्रीर्बद्धच्छदपुटकवाटं(ङ्) कुवलयं(ञ्)
जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ॥ 56 ॥

दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा
दवीयांसं(न्) दीनम् स्नपय कृपया मामपि शिवे ।
अनेनायं(न्) धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥ 57 ॥

अरालं(न्) ते पालीयुगलमगराजन्यतनये
न केषामाधत्ते कुसुमशरकोदण्डकुतुकम् ।
तिरश्चीनो यत्र श्रवणपथमुल्लङ्घ्य विलसन्-
नपाङ्गव्यासङ्गो दिशति शरसन्धानधिषणाम् ॥ 58 ॥

स्फुरद्गण्डाभोगप्रतिफलितताटङ्कयुगलं(ञ्)
चतुश्चक्रं(म्) मन्ये तव मुखमिदं(म्) मन्मथरथम् ।
यमारुह्य द्रुह्यत्यवनिरथमर्केन्दुचरणम्
महावीरो मारः(फ्) प्रमथपतये सज्जितवते ॥ 59 ॥

सरस्वत्याः(स्) सूक्तीरमृतलहरीकौशलहरीः(फ्)
पिबन्त्याः(श्) शर्वाणि श्रवणचुलुकाभ्यामविरलम् ।
चमत्कारश्लाघाचलितशिरसः(ख्) कुण्डलगणो
झणत्कारैस्तारैः(फ्) प्रतिवचनमाचष्ट इव ते ॥ 60 ॥

असौ नासावं(म्)शस्तुहिनगिरिवं(म्)शध्वजपटि
त्वदीयो नेदीयः(फ्) फलतु फलमस्माकमुचितम् ।
वहन्नंतर्मुक्ताः(श्) शिशिरतरनिश्वासगलितम्
समृद्ध्या यत्तासाम् बहिरपि च मुक्तामणिधरः ॥ 61 ॥

प्रकृत्या रक्तायास्तव सुदति दन्तच्छदरुचेः(फ्)
प्रवक्ष्ये सादृश्यं(ञ्) जनयतु फलं(वँ) विद्रुमलता ।
न बिम्बं(न्) तद्बिम्बप्रतिफलनरागादरुणि तं(न्)
तुलामध्यारोढुं(ङ्) कथमिव विलज्जेत कलया ॥ 62 ॥

स्मितज्योत्स्नाजालं(न्) तव वदनचन्द्रस्य पिबतां(ञ्)
चकोराणामासीदतिरसतया चञ्चुजडिमा ।
अतस्ते शीतां(म्)शोरमृतलहरीमम्लरुचयः(फ्)
पिबन्ति स्वच्छन्दं(न्) निशि निशि भृशं(ङ्) काञ्जिकधिया ॥ 63 ॥

अविश्रान्तं(म्) पत्युर्गुणगणकथाम्रेडनजपा
जपापुष्पच्छाया तव जननि जिह्वा जयति सा ।
यदग्रासीनायाः(स्) स्फटिकदृषदच्छच्छविमयी
सरस्वत्या मूर्तिः(फ्) परिणमति माणिक्यवपुषा ॥ 64 ॥

रणे जित्वा दैत्यानपहृतशिरस्त्रैः(ख्) कवचिभिर्-
निवृत्तैश्चण्डां(म्)शत्रिपुरहरनिर्माल्यविमुखैः ।
विशाखेन्द्रोपेन्द्रैः(श्) शशिविशदकर्पूरशकला
विलीयन्ते मातस्तव वदनताम्बूलकबलाः ॥ 65 ॥

विपञ्च्या गायन्ती विविधमपदानं(म्) पशुपतेः
त्वयारब्धे वक्तुं(ञ्) चलितशिरसा साधुवचने ।
तदीयैर्माधुर्यैरपलपिततन्त्रीकलरवां(न्)
निजां(वँ) वीणां(वँ) वाणी निचुलयति चोलेन निभृतम् ॥ 66 ॥

कराग्रेण स्पृष्टं(न्) तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तम् मुहुरधरपानाकुलतया ।
करग्राह्यं(म्) शम्भोर्मुखमुकुरवृन्तं(ङ्) गिरिसुते
कथङ्कारं(म्) ब्रूमस्तव चिबुकमौपम्यरहितम् ॥ 67 ॥

भुजाश्लेषान् नित्यम् पुरदमयितुः(ख्) कण्टकवती
तव ग्रीवा धत्ते मुखकमलनालश्रियमियम् ।
स्वतः(श्) श्वेता कालागुरुबहुलजम्बालमलिना
मृणालीलालित्यं(वँ) वहति यदधो हारलतिका ॥ 68 ॥

गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे
विवाहव्यानद्धप्रगुणगुणसङ्ख्याप्रतिभुवः ।
विराजन्ते नानाविधमधुररागाकरभुवां(न्)
त्रयाणां(ङ्) ग्रामाणाम् स्थितिनियमसीमान इव ते ॥ 69 ॥

मृणालीमृद्वीनां(न्) तव भुजलतानां(ञ्) चतसृणां(ञ्)
चतुर्भिः(स्) सौन्दर्यम् सरसिजभवः(स्) स्तौति वदनैः ।
नखेभ्यः(स्) सन्त्रस्यन् प्रथममथनादन्धकरिपोश्-
चतुर्णां(म्) शीर्षाणाम् सममभयहस्तार्पणधिया ॥ 70 ॥

नखानामुद्द्योतैर्नवनलिनरागं(वँ) विहसतां(ङ्)
कराणां(न्) ते कान्तिं(ङ्) कथय कथयामः(ख्) कथमुमे ।
कयाचिद्वा साम्यम् भजतु कलया हन्त कमलं(यँ)
यदि क्रीडल्लक्ष्मीचरणतललाक्षारुणदलम् ॥ 71 ॥

समं(न्) देवि स्कन्दद्विपवदनपीतं(म्) स्तनयुगं(न्)
तवेदं(न्) नः(ख्) खेदम् हरतु सततं(म्) प्रस्नुतमुखम् ।
यदालोक्याशङ्काकुलितहृदयो हासजनकः(स्)
स्वकुम्भौ हेरम्बः(फ्) परिमृशति हस्तेन झडिति ॥ 72 ॥

अमू ते वक्षोजावमृतरसमाणिक्यकुतुपौ
न सन्देहस्पन्दो नगपतिपताके मनसि नः ।
पिबन्तौ तौ यस्मादविदितवधूसङ्गरसिकौ
कुमारावद्यापि द्विरदवदनक्रौञ्चदलनौ ॥ 73 ॥

वहत्यम्ब स्तम्बेरमदनुजकुम्भप्रकृतिभिः(स्)
समारब्धां(म्) मुक्तामणिभिरमलां(म्) हारलतिकाम् ।
कुचाभोगो बिम्बाधररुचिभिरन्तः(श्) शबलिताम्
प्रतापव्यामिश्राम् पुरदमयितुः(ख्) कीर्तिमिव ते ॥ 74 ॥

तव स्तन्यं(म्) मन्ये धरणिधरकन्ये हृदयतः(फ्)
पयः(फ्)पारावारः(फ्) परिवहति सारस्वतमिव ।
दयावत्या दत्तं(न्) द्रविडशिशुरास्वाद्य तव यत्
कवीनां(म्) प्रौढानामजनि कमनीयः(ख्) कवयिता ॥ 75 ॥

हरक्रोधज्वालावलिभिरवलीढेन वपुषा
गभीरे ते नाभीसरसि कृतसङ्गो मनसिजः ।
समुत्तस्थौ तस्मादचलतनये धूमलतिका
जनस्तां(ञ्) जानीते तव जननि रोमावलिरिति ॥ 76 ॥

यदेतत् कालिन्दीतनुतरतरङ्गाकृति शिवे
कृशे मध्ये किञ्चित् जननि तव यद्भाति सुधियाम् ।
विमर्दादन्योऽन्यं(ङ्) कुचकलशयोरन्तरगतं(न्)
तनूभूतं(वँ) व्योम प्रविशदिव नाभिं(ङ्) कुहरिणीम् ॥ 77 ॥

स्थिरो गङ्गावर्तः(स्) स्तनमुकुलरोमावलिलता
कलावालं(ङ्) कुण्डं(ङ्) कुसुमशरतेजोहुतभुजः ।
रतेर्लीलागारं(ङ्) किमपि तव नाभिर्गिरिसुते
बिलद्वारं(म्) सिद्धेर्गिरिशनयनानां(वँ) विजयते ॥ 78 ॥

निसर्गक्षीणस्य स्तनतटभरेण क्लमजुषो
नमन्मूर्तेर्नारीतिलक शनकैस्त्रुट्यत इव ।
चिरं(न्) ते मध्यस्य त्रुटिततटिनीतीरतरुणा
समावस्थास्थेम्नो भवतु कुशलं(म्) शैलतनये ॥ 79 ॥

कुचौ सद्यः(स्) स्विद्यत् तटघटितकूर्पासभिदुरौ
कषन्तौ दोर्मूले कनककलशाभौ कलयता ।
तव त्रातुं(म्) भङ्गादलमिति वलग्नं(न्) तनुभुवा
त्रिधा नद्धं(न्) देवि त्रिवलि लवलीवल्लिभिरिव ॥ 80 ॥

गुरुत्वं(वँ) विस्तारं(ङ्) क्षितिधरपतिः(फ्) पार्वति निजान्-
नितम्बादाच्छिद्य त्वयि हरणरूपेण निदधे ।
अतस्ते विस्तीर्णो गुरुरयमशेषां(वँ) वसुमतीं(न्)
नितम्बप्राग्भारः(स्) स्थगयति लघुत्वं(न्) नयति च ॥ 81 ॥

करीन्द्राणां(म्) शुण्डान् कनककदलीकाण्डपटली-
मुभाभ्यामूरुभ्यामुभयमपि निर्जित्य भवति ।
सुवृत्ताभ्यां(म्) पत्युः(फ्) प्रणतिकठिनाभ्यां(ङ्) गिरिसुते
विजिग्ये जानुभ्यां(वँ) विबुधकरिकुम्भद्वयमसि ॥ 82 ॥

पराजेतुं(म्) रुद्रं(न्)  द्विगुणशरगर्भौ गिरिसुते
निषङ्गौ जङ्घे ते विषमविशिखो बाढमकृत ।
यदग्रे दृश्यन्ते दशशरफलाः(फ्) पादयुगली-
नखाग्रच्छद्मानः(स्) सुरमकुटशाणैकनिशिताः ॥ 83 ॥

श्रुतीनां(म्) मूर्धानो दधति तव यौ शेखरतया
ममाप्येतौ मातः(श्) शिरसि दयया धेहि चरणौ ।
ययोः(फ्) पाद्यं(म्) पाथः(फ्) पशुपतिजटाजूटतटिनी
ययोर्लाक्षालक्ष्मीररुणहरिचूडामणिरुचिः ॥ 84 ॥

नमोवाकं(म्) ब्रूमो नयनरमणीयाय पदयोस्-
तवास्मै द्वन्द्वाय स्फुटरुचिरसालक्तकवते ।
असूयत्यत्यन्त(यँ) यदभिहननाय स्पृहयते
पशूनामीशानः(फ्) प्रमदवनकङ्केलितरवे ॥ 85 ॥

मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं(लँ)
ललाटे भर्तारं(ञ्) चरणकमले ताडयति ते ।
चिरादन्तः(श्) शल्यं(न्) दहनकृतमुन्मूलितवता
तुलाकोटिक्वाणैः(ख्) किलिकिलितमीशानरिपुणा ॥ 86 ॥

हिमानीहन्तव्यम् हिमगिरिनिवासैकचतुरौ
निशायां(न्) निद्राणं(न्) निशि चरमभागे च विशदौ ।
वरं(लँ) लक्ष्मीपात्रम् श्रियमतिसृजन्तौ समयिनाम्
सरोजं(न्) त्वत्पादौ जननि जयतश्चित्रमिह किम् ॥ 87 ॥

पदं(न्) ते कीर्तीनां(म्) प्रपदमपदं(न्) देवि विपदां(ङ्)
कथं(न्) नीतं(म्) सद्भिः(ख्) कठिनकमठीकर्परतुलाम् ।
कथं(वँ) वा बाहुभ्यामुपयमनकाले पुरभिदा
यदादाय न्यस्तं(न्) दृषदि दयमानेन मनसा ॥ 88 ॥

नखैर्नाकस्त्रीणां(ङ्) करकमलसङ्कोचशशिभिस्
तरूणां(न्) दिव्यानाम् हसत इव ते चण्डि चरणौ ।
फलानि स्वः(स्)स्थेभ्यः(ख्) किसलयकराग्रेण ददतां(न्)
दरिद्रेभ्यो भद्राम् श्रियमनिशमह्नाय ददतौ ॥ 89 ॥

ददाने दीनेभ्यः(श्) श्रियमनिशमाशानुसदृशी-
ममन्दं(म्) सौन्दर्यप्रकरमकरन्दं(वँ) विकिरति ।
तवास्मिन् मन्दारस्तबकसुभगे यातु चरणे
निमज्जन्मज्जीवः(ख्) करणचरणः(ष्) षट्चरणताम् ॥ 90 ॥

पदन्यासक्रीडापरिचयमिवारब्धुमनसः(स्)
स्खलन्तस्ते खेलम् भवनकलहं(म्)सा न जहति ।
अतस्तेषां(म्) शिक्षाम् सुभगमणिमञ्जीररणितच्-
छलादाचक्षाणं(ञ्) चरणकमलं(ञ्) चारुचरिते ॥ 91 ॥

गतास्ते मञ्चत्वं(न्) द्रुहिणहरिरुद्रेश्वरभृतः(श्)
शिवः(स्) स्वच्छच्छायाघटितकपटप्रच्छदपटः ।
त्वदीयानां(म्) भासाम् प्रतिफलनरागारुणतया
शरीरी शृङ्गारो रस इव दृशां(न्) दोग्धि कुतुकम् ॥ 92 ॥

अराला केशेषु प्रकृतिसरला मन्दहसिते
शिरीषाभा चित्ते दृषदुपलशोभा कुचतटे ।
भृशं(न्) तन्वी मध्ये पृथुरुरसिजारोहविषये
जगत्त्रातुं(म्) शम्भोर्जयति करुणा काचिदरुणा ॥ 93 ॥

कलङ्कः(ख्) कस्तूरी रजनिकरबिम्बं(ञ्) जलमयं(ङ्)
कलाभिः(ख्) कर्पूरैर्मरकतकरण्डं(न्) निबिडितम् ।
अतस्त्वद्भोगेन प्रतिदिनमिदं(म्) रिक्तकुहरं(वँ)
विधिर्भूयो भूयो निबिडयति नूनं(न्) तव कृते ॥ 94 ॥

पुरारातेरन्तः(फ्) पुरमसि ततस्त्वच्चरणयोः(स्)
सपर्यामर्यादा तरलकरणानामसुलभा ।
तथा ह्येते नीताः(श्) शतमखमुखाः(स्) सिद्धिमतुलां(न्)
तव द्वारोपान्तस्थितिभिरणिमाद्याभिरमराः ॥ 95 ॥

कलत्रं(वँ) वैधात्रं(ङ्) कतिकति भजन्ते न कवयः(श्)
श्रियो देव्याः(ख्) को वा न भवति पतिः(ख्) कैरपि धनैः ।
महादेवं(म्) हित्वा तव सति सतीनामचरमे
कुचाभ्यामासङ्गः(ख्) कुरवकतरोरप्यसुलभः ॥ 96 ॥

गिरामाहुर्देवीं(न्) द्रुहिणगृहिणीमागमविदो
हरेः(फ्) पत्नीं(म्) पद्माम् हरसहचरीमद्रितनयाम् ।
तुरीया कापि त्वं(न्) दुरधिगमनिः(स्)सीममहिमा
महामाया विश्वम् भ्रमयसि परब्रह्ममहिषि ॥ 97 ॥

कदा काले मातः(ख्) कथय कलितालक्तकरसम्
पिबेयं(वँ) विद्यार्थी तव चरणनिर्णेजनजलम् ।
प्रकृत्या मूकानामपि च कविताकारणतया
कदा धत्ते वाणीमुखकमलताम्बूलरसताम् ॥ 98 ॥

सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विहरते
रतेः(फ्) पातिव्रत्यम् शिथिलयति रम्येण वपुषा ।
चिरं(ञ्) जीवन्नेव क्षपितपशुपाशव्यतिकरः(फ्)
परानन्दाभिख्यम् रसयति रसं(न्) त्वद्भजनवान् ॥ 99 ॥

प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः(स्)
सुधासूतेश्चन्द्रोपलजललवैरर्घ्यरचना ।
स्वकीयैरम्भोभिः(स्) सलिलनिधिसौहित्यकरणं(न्)
त्वदीयाभिर्वाग्भिस्तव जननि वाचां(म्) स्तुतिरियम् ॥ 100 ॥

## अनुबन्धः

समानीतः(फ्) पद्भ्याम् मणिमुकुरतामम्बरमणिर्
भयादास्यादन्तः(स्) स्तिमितकिरणश्रेणिमसृणः।
दधाति त्वद्वक्त्रम्प्रतिफलनमश्रान्तविकचं(न्)
निरातङ्कं(ञ्) चन्द्रान्निजहृदयपङ्केरुहमिव ॥ 101 ॥

समुद्भूतस्थूलस्तनभरमुरश्चारु हसितं(ङ्)
कटाक्षे कन्दर्पः(ख्) कतिचन कदम्बद्युति वपुः ।
हरस्य त्वद्भ्रान्तिं(म्) मनसि जनयन्ति स्म विमलाः
भवत्या ये भक्ताः(फ्) परिणतिरमीषामियमुमे ॥ 102 ॥

निधे नित्यस्मेरे निरवधिगुणे नीतिनिपुणे
निराघातज्ञाने नियमपरचित्तैकनिलये ।
नियत्या निर्मुक्ते निखिलनिगमान्तस्तुतिपदे
निरातङ्के नित्ये निगमय ममापि स्तुतिमिमाम् ॥ 103 ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छङ्करभगवतः(ख्) कृतौ सौन्दर्यलहरी सम्पूर्णा ॥